इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकगेपतिवत् (429) ज्ञेयानि। शतरि-पैणन्-न्ती इति रूपमिति विशेषः।

## (1064) "ओ प्यायी वृद्धौ" (I-भ्वादिः-488. अक. सेट्. आत्म.)

प्रायेणायमाङ्पूर्वः।

प्यायकः-यिका, प्यायकः-यिका, [1]पिप्यायिषकः-षिका, [2]पेपीयकः-यिका;
प्यायिता-त्री, प्याययिता-त्री, पिप्यायिषिता-त्री, पेपीयिता-त्री;
— [3]आप्याययन्-न्ती; आप्याययिष्यन्-न्ती-ती; —
आप्यायमानः, आप्याययमानः, पिप्यायिषमाणः, पेपीयमानः;
आप्यायिष्यमाणः, आप्याययिष्यमाणः, पिप्यायिषिष्यमाणः, पेपीयिष्यमाणः;
[4]सुप्याः-सुप्यौ-सुप्यः; — — —
[5]पीनः-पीनवान्, [6]आप्यानः[A]-प्रप्यानः(चन्द्रमाः), [7]आपीनम्[B] (अन्धूः, ऊधो वा), प्यायितः, पिप्यायिषितः, पेपीयितः-तवान्;
प्यायः, [8]प्यायिता[C], [9]पिप्यिवान्,

---

1. सन्नन्तात् ण्वुलि, अभ्यासे हलादिशेषे, इडागमे च रूपम्।
2. यङन्ते सर्वत्र, 'लिड्यङोश्च' (6-1-29) इति पीभावे, द्विर्वचने अभ्यासे गुणश्चेति ज्ञेयम्।
3. चित्तवत्कर्तृकत्वे परस्मैपदमेव। अचित्तवत्कर्तृकत्वे तु आत्मनेपदमेव।
4. क्विपि वलि लोपे रूपमेवम्।
5. '**प्यायः पी**' (6-1-28) इति विकल्पेन प्रकृतेः पीभावः। '**श्वीदितो निष्ठायाम्**' (7-2-14) इतीण्निषेधः। '**ओदितश्च**' (8-2-44) इति निष्ठानत्वम्।
6. '**प्यायः पी**' (6-1-28) इत्यत्र व्यवस्थितविभाषाश्रयणात्, सोपसर्गात् पीभावो न। तेनात्र वलि लोपे निष्ठानत्वे च रूपं ज्ञेयम्।
7. 'आङ्पूर्वादन्धूधसोरिति वक्तव्यम्' (वा. 6-1-28) इति वचनात् अन्धूधसो-र्विशेष्ययोः आङुपसृष्टादस्माद्धातोः पीभावे निष्ठानत्वे च रूपं ज्ञेयम्।
8. धातोर्यकारान्तत्वेन 'न यः' (3-2-152) इति युचो निषेधात्, तच्छीलादिषु कर्तृषु औत्सर्गिकः 'तृन्' (3-2-135) इति तृन्नेव।
9. लिटः क्वसौ, 'लिड्यङोश्च' (6-1-29) इति पीभावे, 'वस्वेकाजाद्घसाम्' (7-2-67) इतीडागमे यणादेशे च रूपम्।

A. '**यदाप्यानं** हिमोस्रेण भवत्युपवनं कपिः॥' भ. का. 9.2.
B. '**आपीन**भारोद्वहनप्रयत्नात् गृष्टिर्गुरुत्वाद् वपुषो नरेन्द्रः।' रघुवंशे 2.18.
C. '**नावैत्याप्यायितारं** किं कमलानि रविं कपिः।' भ. का. 7.17.